# यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्

शुभङ्कर दासः

भारतीयसंस्कृतेः आधारशिलयोरन्यतमम् इदं कृष्णद्वैपायनविरचितं महाभारतम्। न नूनमस्य ग्रन्थस्य उद्देश्यं कौरव-पाण्डवयोः युद्धवर्णनम्, अपि तु भारतीयधर्मस्य कार्त्स्न्येन सविस्तरं चित्रणम्। सुजीवनादर्शं ख्यापयद् न्यायान्यायविवेकपूर्वकं धर्मशास्त्रस्यापि कार्यं कुरुते शास्त्रमिदम्। महाभारतस्यास्य गुणकीर्तनावसरे प्राप्यते श्लोकोऽयम्–

धर्मे ह्यर्थे च कामे च, मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥ इति।

श्लोकस्थेन "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्" इति वाक्येन अखिलसंसारस्य सारः सङ्ग्रहश्चात्र महाभारते लभ्यते इत्यवबोधितम्। तत्कथमिति विविधविषयान् आश्रित्य अधः विचारितम्।

## १. महाभारते पुरुषार्थोपदेशः

पुरुषैः अर्थ्यमानाः चत्वारः पुरुषार्थाः धर्मार्थकाममोक्षाः प्रसिद्धाः शास्त्रेषु लोकाचारेषु च। तत्र नैके मोक्षपरकाः दार्शनिकग्रन्थाः, धर्मपरकाः यज्ञादिग्रन्थाश्च प्राप्यन्ते, परन्तु अतिविरलाः ते ग्रन्थाः, यत्र एकत्र सर्वे पुरुषार्थाः व्याख्याताः। तथाहि-

**१.१. धर्मः** कृत्याकृत्यविवेकैः नीरक्षीरविवेचनपूर्वकं जीवनं यापयन्ति विचक्षणाः। स च कृत्याकृत्यविवेकः धर्मशास्त्रग्रन्थे उल्लिखितः। कश्च धर्मः इति चेदुच्यते– ध्रियते अनेन इति धर्मः इति। तथाह्युक्तं महाभारते–

ध्रियते धर्म इत्याहुर्धर्मो धारयते प्रजाः।
तस्माद्धर्मो न हन्तव्यः, धर्मो रक्षति रक्षितः॥ इति।

महाभारते भूरिशः धर्माधर्मविचारः प्राप्यते। यथात्र श्रीकृष्णार्जुनयुधिष्ठिरभीष्मविदुरादीनां धर्ममार्गः, तथैव च दुर्योधनादीनाम् अधर्मानुसरणमपि व्याख्यातमत्र, येन मानवाः द्वयोः स्पष्टतरविवेकेन धर्ममार्गेण जीवनम् अतिवाहयितुं शक्नुयुः। यक्षयुधिष्ठिरसंवादे धर्मः न नूनम् उपदेशमात्रम्, अपि तु जीवनाचरणमेवेति ज्ञापितम्। तत्र चोक्तं युधिष्ठिरेण–

यशः सत्यं दमः शौचमार्जवं ह्रीरचापलम्।
दानं तपो ब्रह्मचर्यमित्येतास्तनवो मम॥ इति।

द्विविधो हि धर्ममार्गः प्रवृत्तिः निवृत्तिश्चेति। श्रीशङ्करभगवत्पादानां व्याख्यानानुसारम् अभ्युदयलक्षणः सांसारिकमार्गः प्रवृत्तिमार्गः, मोक्षशास्त्रविचारभूतः परमात्मभावलक्षणः श्रेयोमार्गश्च निवृत्तिमार्गः इत्युच्यते। तत्र प्रवृत्तिमार्गे कः आदर्शः अवलम्बनीयः इति विषये द्विजव्याधसंवादे व्याख्यातम्–

के न हिंसन्ति जीवान् वै लोकेऽस्मिन् द्विजसत्तम।
बहु सञ्चिन्त्य इह वै नास्ति कश्चिदहिंसकः॥ इति।

**१.२. अर्थकामौ** चरित्रोन्नत्यै यानि स्वस्वकालवर्णोचितकार्याणि प्रख्यातानि, तान्येव अर्थकामादिषु


*dīpaśikhā*/v1/2023/Subhankar Das/pp. 5-8

च सहायकानि भवन्ति। अर्थशास्त्रीया आधुनिकी विद्या, प्राचीनसामाजिकादर्शश्च प्रदर्शितं प्रकृते। सुजीवनयापनाय अर्थोपार्जनम्, संरक्षणम्, भोगश्चेति त्रयो विषयाः अपेक्षन्ते। अत एव अर्थकामयोः प्रेरयति महाभारतम्, यथा–

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥ इति।

तस्माद्धि अर्थोपार्जनसाधनोपदेशाय कृष्यादयो व्याख्याताः। प्रोक्तञ्च– "न स समितिं गच्छेत् यश्च नो निर्वपेत् कृषिम्॥" इति।

**१.३. मोक्षः** अस्मिन्नेव महाभारते भीष्मपर्वणि श्रीमद्भगवद्गीता प्रख्याता, या च परमात्मदर्शनरूपं मोक्षम् उपदिशति। अस्य च ग्रन्थस्य अष्टादशसु अध्यायेषु मोक्ष एव मूलतः प्रतिपादितः। अस्य च ग्रन्थस्य विविधवेदान्ताचार्याणां स्वस्वदार्शनिकमतानुसारं व्याख्याः दृश्यन्ते। अस्माच्च ग्रन्थाद् उपनिषदुक्ततत्त्वानि उपलभ्यन्ते, यथा– ज्ञानकर्मादिमार्गाः, ब्रह्मविद्या, आत्मज्ञानम् इति। तेनात्र चत्वारोऽपि पुरुषार्थाः व्याख्याताः इति स्पष्टम्।

ननु इमे चत्वारः पुरुषार्थाः अन्यत्रापि महाकाव्यादिषु लभ्येरन्, कथमस्यैव गरिमोक्तिः– "न तत् क्वचिद्" इति चेदुच्यते यत्, इतरे ग्रन्थाः पुरुषार्थवर्णनेनैव समाप्ताः, अत्र तदतिरिच्यापि नैके तादृशाः विषयाः वर्णिताः, येषु केचन धर्मशास्त्रादौ प्राप्यन्ते, केचन वा साहित्यशास्त्रे, केचन वा अन्यत्र शास्त्रान्तरे। परन्तु तेषां समेषां सङ्गमो हि नान्यत्र, अपि तु महाभारते एवेति युक्तास्य गरिमोक्तिः।

## २. महाभारतस्य सामाजिकोपदेशः

विविधसामाजिकोपदेशाः प्राप्यन्ते महाभारतात्, ये चोपदेशाः आदर्शजीवनयापनाय आलम्बनभूताः। तादृशाः केचन उपदेशाः यावत्– भीष्मस्य पितृभक्तिः, एकलव्यार्जुनयोः गुरुभक्तिः, पुत्रपुत्र्योः साम्यमित्यादयः। तथाह्युक्तं महाभारते–

"यथैवात्मा तथा पुत्रः, पुत्रेण दुहिता समा॥" इति।

साम्प्रतिके काले नारीपुरुषयोः साम्यविषये सर्वकारैः यः प्रयत्नः विधीयते, तस्य मार्गदर्शनं तु सुप्राचीने महाभारते एव पूर्वतः प्रदत्तम्। अपि च, गान्धारी-कुन्ती-द्रौपदी-सुभद्रादिनारीणां यत् सामर्थ्यं कर्तव्यबोधः नेतृत्वञ्च प्राप्यते तद् अद्यतनीयनारीणां सर्वक्षेत्रेषु साम्यावदाने विविधकार्येषु नेतृत्वप्रदाने च प्रेरकं भवति। अभ्युन्नत्या सह नीतिमार्गोऽपि उपदिष्टः चतुराश्रमिणाम् आदर्शजीवनोपदेशज्ञापनेन। तथाहि–

१. ब्राह्मणस्य यज्ञाध्ययनदानादयः।
२. क्षत्रियस्य राज्यपालनादयः।
३. वैश्यस्य कृषि-पशुपालन-वाणिज्यादयः।
४. शूद्रस्य द्विजादित्रयाणां वर्णानां सेवा।

## ३. महाभारते राजधर्मः

राजा यथा चरते लोकस्तदनुवर्तते इति श्रूयते लोके, तस्माद् राज्ञा विचक्षणेन भाव्यम् इति नीतिम् अनुसृत्य आदर्शराजधर्मो व्याख्यातः प्रकृते। महाभारतस्थराजधर्मज्ञानं विना कोऽपि पूर्णतया राजनीतिविलक्षणो भवितुं नार्हति इति विदुषां मतम्। राजनीतेः नेतारं प्रति महाभारतं महनीयम् आदर्शम् उपस्थापयति। सुधर्मसंस्थापनस्य उत्तरदायित्वं राज्ञामेव इति कथयति ग्रन्थोऽयम्।

इत्थमपि उल्लिखितमत्र यत्, यदि राजा प्रजापालनं न कुर्यात्, तर्हि न नूनं प्रजानामेव क्षयः, अपि तु वैदिकधर्मस्यापि लोपः स्यात्। तस्माद् राज्ञा कथं स्थेयमिति विषये प्रोक्तम्–

मृदुर्हि राजा सततं, लङ्घ्यो भवति सर्वशः।
अवमन्यन्ति भर्तारं, संघर्षादुपजीविनः।
स्वस्थाने न तिष्ठन्ति, लङ्घयन्ति च तद्वचः॥ इति।

किञ्च, राजधर्मे नष्टे सति राष्ट्रस्य नाशो भवति। तस्माद्धि "राजा राजपुरुषाणां मेरुदण्डः" इत्यादिवचोभिः महाभारतम् उच्चैः राजधर्मस्य उत्कृष्टताम्, राजनीतेः उपादेयताञ्च ख्यापयति।

## ४. महाभारतस्य साहित्यिकमहत्त्वम्

"शब्दार्थौ सहितौ काव्यम्" इति आचार्यभामहस्य काव्यलक्षणादारभ्य काव्यस्य यावन्ति प्रयोजनानि प्रोक्तानि, तानि सर्वाणि महाभारते उपलभ्यन्ते। तथाहि–

**४.१. गुणः रीतिश्च** काव्यशास्त्रीयदृष्ट्या महाभारते पाञ्चालीरीतिः वर्तते। तत्र च पाञ्चालीरीतेः लक्षणं प्रोक्तम्–

"शब्दार्थयोः समो गुम्फः पाञ्चालीरीतिरिष्यते॥" इति।

गुणेष्वपि ये त्रयो गुणाः प्रख्याताः आलङ्कारिकसम्प्रदाये ओजः, प्रसादः, माधुर्यञ्चेति, तेषां त्रयाणामेव भूरिशो दृष्टान्ताः प्रतिपदं प्राप्यन्ते महाकाव्येऽस्मिन्।

**४.२. रसः** रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः इति पण्डितराजजगन्नाथवचनात् काव्यस्य हृदयं ह्यं रसः, यश्च नवविधः। श्रूयते च साहित्यदर्पणे श्लोकोऽयम्

श्रृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।
बीभत्सोऽद्भुत इत्यष्टौ शान्तोऽपि नवमो रसः॥ इति।

यद्यपि महाभारते नैके रसाः प्राप्यन्ते, यथा- १. सुभद्रार्जुनयोः परिणयवेलायां श्रृङ्गारः, २. सभापर्वणि हास्यम्, ३. युद्धवेलायां वीरः, ४. दुःशासनादिवधकाले बीभत्सः, ५. अभिमन्युप्रभृतीनां वीरगतिकाले करुणः; तथापि मुख्यतः अत्र अङ्गिरसस्तावत् शान्तः एव।

**४.३. अलङ्कारः** शब्दार्थभेदेन अलङ्कारो द्विविधो मतः। तेषु शब्दालङ्कारेषु महाभारते मुख्यतः अनुप्रासः, अर्थालङ्कारेषु उपमारूपकोत्प्रेक्षादयः प्राप्यन्ते। तत्र अनुप्रासस्य एकः दृष्टान्तस्तावद् भीमवर्णनप्रसङ्गे–

"भीमो भीमपराक्रमः। अशोकः शोकनाशनः॥" इति।

**४.४. छन्दः** छन्दःपादौ तु वेदस्य इति पाणिनीयवचनाद् वेदान्ताङ्गान्तर्भूतमिदं छन्दः काव्याङ्गेषु अन्यतमम्। महाभारते यद्यपि विविधपर्वणि मध्ये मध्ये विविधच्छन्दस्सु श्लोकाः प्राप्यन्ते, तथापि बाहुल्येन अनुष्टुप्छन्दसि एव श्लोकाः उपलभ्यन्ते। न नूनम् एतावतैव समाप्तोऽयं काव्यमहिमा महाकाव्यस्यास्य। प्रकृतेऽस्मिन् पद्यात्मककाव्येन सह गद्यात्मकभामोऽपि क्वचित् प्राप्यते, यद्धि चम्पूकाव्यलक्षणमिति आमनन्ति साहित्यिकाः। लक्षणं चोक्तं महाकविना दण्डिना "गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते" इति। समर्थितञ्चेदं महाभारतस्य ख्यातिप्रसङ्गे–

"अलङ्कृतैः शुभैः शब्दैः छन्दोवृत्तैश्च विविधैः॥" इति।

एतावता सर्वविधविषयाणां महाप्रयोगभूतमिदं महाभारतम् इति यद्यपि प्रतिपादितम्, तथापि

अस्यैकं विशिष्टं वैलक्षण्यं वर्तते। तथाहि न नूनमिदं सत्यवृत्तान्ताधारेणैव रचितत्वाद् ऐतिहासिकमिति, अद्यपर्यन्तं सनातनधर्मवद् देदीप्यमानत्वात् प्रतिक्षणम् उपयुक्तत्वाच्च पुराणमपि।

तस्माद् यथात्रस्था नीतिः स्वाधीनतासङ्ग्रामकाले पथप्रदर्शिकासीत्, एवमद्यापि अमृतमहोत्सववेलायां पाथेयभूतेत्यतः युक्तं वचनमिदम्- "यदिहास्ति तदन्यत्र यन्नेहास्ति, न तत् क्वचित्" इति शिवम्॥

